627
1995
109

रसतरंगिणी

Rus Turungeenee -

॥ अथरसतरंगिणिप्रारंभः॥संख्या ॥१८०॥

11
529
1995

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥ श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥श्रीगुरुभ्योनमः॥श्रीनवचामुंडायैनमः॥ लक्ष्मीमालोक्यतुभ्यंचिन्निगममुपहस
न्शौचयतु यन्नजंतून्स्वत्रंशोणाक्षिपश्यन्समितिदशमुखंवीक्ष्यरोमांचमंचन्॥ हल्लाहल्यंगवीनंचकितमपसरन्स्वेछरक्षोरि
गंतान्सिंचन्देत्तेनभूमिंनिलयमिवतुलयन्पातुमांपीतवासाः॥१॥भारत्याःशास्त्रकोतारश्रोतायाःशेत्यकारिणी॥क्रियतेभानुनाभूरि
रसारतरंगिणी॥२॥वाणीकमळळिनीभानोरेषारसतरंगिणी॥हंसाःस्तनधियस्तत्रयुक्तमत्रविधीयतां॥३॥गिरांदेवितरंगिण्योवार
यत्कूरवारणान्॥यद्भविष्यतिलोकानामाविलोविरलोरसः॥४॥होनोःपूर्वविनिश्चियमादनःपूर्वमेवनस्योपन्यासःसमुचितःरसस्य
हेनवोभावादयस्तेनरसेभ्यःपूर्वंभावादयएवनिरूप्यंतो।रसानुकूलोविकारोभावः॥विकारोन्यथाभावः॥विकारश्चद्विविधःओतरःशा
रीरश्च॥अंतरोपिद्विविधः॥स्थायिभावोव्यभिचारीभावश्चेति।शारीरास्तुसात्विकाः॥यतुमनोविकारोभावस्तनश्चदेहविकारेस्वेदा
दोभावपदप्रयोगोगौणइतिनल॥तुल्यवदुभयत्रभावपदप्रयोगेणविनिगंतुंमशक्यत्वात्॥लक्षणानुरोधेनळक्ष्यान्यवस्थितेः॥इ
तरभावस्यात्मभावस्योपनायकत्वेसतिसजातीयविजातीयभावानभिभाव्यःप्रथमःपरानभिभाव्योमनोविकारोवासकलप्रधानोम
नोविकारइतिवास्थायिभावः॥नचव्यभिचारिणात्मकेभावेवाव्यभिचारः॥तस्येतरभावस्यात्मभावस्योपनयनायकत्वाभावात्॥च
रमसमयपर्यंतंस्थायित्वादस्यस्थायित्वव्यपदेशः॥सचाष्टधा॥तत्रभरतः॥रतिर्हासश्चशोकश्चक्रोधोत्साहोभयंतथा॥जुगुप्साविस्मयश्चेतिस्थायिभावाःप्रकीर्तिताः॥१॥तत्रइष्टवस्तुसंयोगाद्यनितामनोविप्लुतिर्परिपूर्णारतिःसाचाङ्गेचिद्दर्शनेश्रवणेनचित्स्मरणेन॥यथा॥चक्षुर्यस्यप्लुषावलोकितंदीपायूषपाथोधरोभ्रूसंज्ञापरिचारिकासमजनिस्पर्शोतंस्मितंदोहदं॥संतापंतरुणार्कशारुचिनिश्वासवाताहतिंकस्मादेषसहिष्यतेसचसखिप्रेमद्रुमःकोमळः॥१॥कोमळपदापरिपूर्णता॥कृतघ्नेळनवचनवेषवै
सादृश्यप्लुतोमनोविकारःपरिमितोहासः॥वचनभेदवेषभेदप्लुतेभ्योक्रोधोवानतिव्याप्तिः॥तत्रकृतघ्नेळप्लुतत्वाभावात्॥यथानचर
णानो॥आगछंनूनगरोपकं॥ठमिलितैरावेष्टितोबाळकैःश्रुत्वांतेपरिचारिकाभिरभितः सोल्लासमावेदितः॥साकूतंसकृतघ्नेळं च
ळिवधूंदेपुरोदायत्सन्नंकिंचिदुदंचितस्मितनवःपायात्सवोवामनः॥१॥लवशाद्भादपूर्णताइष्टविश्लेषजनितोपरिपूर्णोमनोविकारोभयं॥तार्क्ष्यपक्ष्मपवनोपसेवितंवीक्ष्यरीक्ष्य

॥१॥

631
1995

तःपरिमितोमनोविकारःशोकः॥नचेष्टविश्लेषजनितविप्रलंभशृंगारस्यकरुणरसंत्वापत्तिः॥तस्यरसत्यानालिंगितत्वात्॥नचरतिश्री
तिस्तयाविनाशोकोपिनोपपद्यतइतिनथाचासंभवइतिवाच्यं॥इष्टसमीहाजनितमनोविप्लुतेःरतेरुक्तत्वात्॥कुमारसंभवेरत्याःकार्दंवयो
महाश्वेतायांरघुकाव्येअजस्यप्रलापेकरुणएवरसः॥तत्रनत्रबाधनिश्चयादिष्टवस्तुसमीहायाःअभावात्॥यत्रमृतेजीवितानाशंतत्रशृंगा
रएवरसः॥बाधसंदेहस्यात्रसंदेहपर्यवसिततयासमीहायाअप्रतिबंधकत्वात्॥तथाचयूनोरेकस्मिन्मृतेप्रलापःकरुणारसः॥जी
वितेविश्लिष्टयोःप्रलापःशृंगारः॥अतएवरसरत्नदीपिकायांकरुणरसोदाहरणे॥अयिजीवितनाथजीवसीत्यभिधायोत्थितयातयापु
नरिति॥ननुविप्रलंभस्यपूर्वानुरागमानंप्रवासस्यकरुणात्मकत्वात्॥जीवतोपरिविप्रलंभस्यकरुणरसत्वमायातमितिचेत्॥सत्यं॥तत्र
करुणस्योगत्वेनभासमानत्वात्॥तत्रकरुणात्मकत्वव्यपदेशःयथा॥विरहज्वरमूर्छयापनंतीनयनेनोश्रुजलेनसिच्यमानां॥समवेक्ष्यर
तिंविनिःश्वसंतींकरुणाकुञ्जलितानबभूवशोभाः॥१॥कुञ्जलितेत्यपूरयति॥अवज्ञादिकृतःप्रमोदप्रतिकूलःपरिमितोमनोविकारःक्रोधःप्र
मोदप्रतिकूलविशेषणात्॥दशमुखदुर्वचनावमानितस्यरामस्यविररसेननिर्व्याप्तिः॥यथापरशुरामवाक्यं॥नाघारभ्यकरोमिकामुकक
ंठनाविन्यस्तहस्तांबुजःकिंचित्पाटलभाजिकोचनयुगेनावन्निमेषोदयं॥यावत्सायककोटिपातितरिपुश्मापाछ - मौलिसचलन्मणी
मात्यपश्यनत्यरागपटलैरामोदिनीमोदिनी॥१॥किंचित्पाटलत्वादपूर्णता॥शौर्यदानदयान्यतरकृतःपरिमितोमनोविकारउत्साहः।वीरस्तु
युध्यदानदयावीरभेदात्त्रिधा॥युध्यवीरस्योत्साहोयथा॥सेनांसंघटयन्धुतिंद्विगुणयन्चापंचमत्कारयन्नेत्रस्याभिमुखोभविष्यतिजग
द्विजयीरावणःइत्यत्र॥साहविचारमूढहृदयोदेवोरघूणांपतिर्ज्यांविन्यासविधिंविनैवविशिखंबाणासनेन्यस्तवान्॥१॥अत्रविचारप
दापूर्णता॥दानवीरस्योत्साहोयथा॥आदर्शीयत्रशंकमंडलमिदंहर्म्यायहेमाचलेदीपायद्युमणिंमहीमिवकथंनोभिक्षवेदनवान्॥
दित्सापल्लवितप्रमोदसलिलव्याकीर्णनेत्रांबुजोजानीमोभरुनंदनस्तदखिलंनप्रार्थयशोदृष्टवान्।पल्लवितंननुफलितमित्यपूर्णता॥द
यावीरस्योत्साहोयथा॥दुःपारसंसारपथोधिपारप्रकारमालोकयतोजनानां॥समुत्थितोबंधसिकैटभारेःकर्णांकुरःकोस्तुभकैतवेन॥१॥
अंकुरापन्यासादपूर्णता॥अपराधविप्लुतरतिविप्लुतसखादिजनितोपरिपूर्णोमनोविकारोभयं॥तार्क्ष्यपक्ष्मपवनोपसेवितंवीक्ष्यरीक्ष्य

यदुनंदनंपुरः॥भीतभीतइवतत्रकाळियोमंदमंदपसर्पमुघनः॥१॥इतोपन्यासादपूर्णता॥अहृद्यदर्शनस्पर्शनस्मरणजनितामनोविकृतिरपरिपूर्णाजुगुप्सा॥शार्दूलशावकचरतश्चरपाद्यमानसारंगशृंगवतिभूभृतिरमतेइः॥वासेचकारनचारतथाजुगुप्सादुःखेषुदुःखमनिरेवनदुखःखितानो॥१॥नतथेतिपदादपूर्णता॥चमत्कारदर्शनस्पर्शनस्मरणजनितापरिपूर्णोविकारोविस्मयः॥यथा॥युध्यंतमजौनंदीक्ष्यकेवोदवानविस्मिताः॥नमेनेबहुगोविंदोदृष्टकर्णपराक्रमः॥१॥नमेनेबहुइतिपदादपूर्णता॥शृंगारादोचमत्कारदर्शनायत्रमनोविकृतिरंगनयाभासतेतत्रशृंगारादयएवरसाः॥यत्रप्रधान्येनभासतेतत्राद्भुतएवरसः॥अंगनयायथा॥वे- म्यंश्रुतिपंकजात्सकरयत्यानेदनीरंहृतोःस्वर्णीलंकरणाह्यनक्षिपुलकोवैधर्म्यमंगश्रियः॥तस्यानूपुरपद्मरागमहसःपादारविंदश्रियोभेदंसिंचितमेवचक्षिकिमितःशिल्पंविधेर्वर्ण्यतां॥१॥प्राधान्येनयथा॥विनासायंकेयंसमुदयतिसौरभ्यसुभगंकरंध्रोरत्नाधारामधिधरणितारापरिवृढः॥धनुर्धत्तेस्मारंरतिपतिविहारंनतमसांतिरातंकःपंकेरुहयुगळमंकेनटयति॥१॥इतिश्रीभानुदत्तविरचितायांरसतरंगिण्यांस्थायिभावनिरूपणंनाममप्रथमतरंगः॥ अथविभावानिरूप्यंते॥ ॥विशेषेणभावयंतिउत्पादयंतिरसांस्तेविभावाः॥ते चद्विविधा॥आलंबनविभावाःउद्दीपनविभावश्चयमालंब्यरसउत्पद्यतेसआलंबनविभावः॥योरसमुद्दीपयतिसउद्दीपनविभावः॥आलंबनविभावोयथा॥प्राणस्यप्रतिमूर्तिःप्रत्यात्मापुण्यरतिकयाः॥अधिदैवतंनयनयोःसाममयाकापिसासेव॥श्रृंगारस्योद्दीपनविभावाः॥तत्रभरतः॥ऋतुमाल्यालंकारैःप्रियजनगोधर्वकाव्यासेवाभिः॥उपवनगमनविहारैःश्रृंगाररसःसमुद्भवति॥चेष्टेदनादयउद्दीपनायाः॥यथा॥सेध्यायोणांवरजघनिकाकामिनोःप्रेमानाद्यांनोदीभाम्यद्भ्रमरविरुतंमारिषःकोपिकालः॥नारापुष्पोजलिमिवकिरन्सुचयन्पुष्पकेतोर्न्यासंभंप्रविशतिसूधादीधितिसूत्रधारः॥१॥अथहास्यविभावाः॥तत्रभरतः॥विपरिनालंकारैर्विकृताचाराभिधानवेशैश्च॥विकृतेरर्थविशेषैर्हसनीतिरसःस्मृताहास्यः॥१॥अंगविक्रियादयउद्दीपनायाः॥यथा॥केयूरंघर्घरचन्भ्रमयन्मौलिंविवर्तयन्बाहुं॥नेत्रेचलेचपलयन्नटयतिमायाशिशुंतायी॥१॥करुणस्यविभावाः॥तत्रभरतः॥इष्टजनस्यविनाशान्नाशाद्वाकूरशाद्वबंधनाद्वासनात्॥एतैरर्थविशेषैःकरुणारस्यरसःसमुद्भवति॥१॥बंधुस्त्रीद्यादयउद्दीपनायाःयथा॥स्तोपश्यतोभुजगपाशनिबंधदेहमाघापिसेयदसवोनबहिःप्रयांति॥नेत्रेनिमीलयसिपश्यसिनेवनाथहास्यंमदीयमितितत्

॥२॥

633
1995

रौद्रमणउक्तंचेव॥१॥रौद्रविभावाः॥तत्रभरतः॥आयुधरक्षाभिभवाद्वैरानुभवाद्विदारणाच्चैव॥संग्रामसंभवार्थादेभ्यःसंजायतेरौद्रः॥१॥वैरिदर्शननिर्भर्त्सनादयउद्दीपनायाःयथा॥तन्वंतीतिमिरघुतिंरुतवतीप्रत्यर्थिचक्रव्यथामेषामार्गचलाबकीविजयतेनिस्त्रिंशधारानिशा॥युध्यत्कुलविपक्षपक्षविदलत्कुंभीद्रकुंभस्थलभ्रश्यन्मौक्तिककेतनेवनपरितःस्तारावलिंवर्षति॥१॥वीरस्यविभावाः॥तत्रभरतः॥उत्साहाध्यवसायाद्विषादविस्मयान्मोहात्॥विविधादर्थविशेषाद्वीररसोनामसंभवति॥१॥विनयबलादयउद्दीपनायः॥यथा॥लंकाधिपःसयतिरोकनायोजंभारिदंभापहबाहुवीर्यः॥इत्यालपंतंहनुमंतमेषरामः॥स्मितेरत्नरयोचकार॥१॥दानवीरस्यविभावोयथा॥वपुषाविनयंविहंतिकेचित्॥वचसाकेपिचरंतिचारुचार्यां॥अतिथौसमुपगतेसपर्यापुलकैःपल्लवयंतिकेपिसंज्ञः॥१॥दयावीरस्यविभावोयथा॥कथमविरलजायद्रक्तिभाजोनिशायोतमसिदुःखगाहेप्राणिनोवीक्षणीयाः॥इतिकिमुसमुदंचद्दीपलेखाभिरामद्युतिमरसिमुरारिःकौस्तुभंसंबभार॥ननुस्वनिष्ठउत्साहःकथमुद्दीपनविभावोभवेदितिचेत्॥सत्यंउद्दीपनविभावोज्ञायमानएवगमकःसचस्वनिष्ठःपरनिष्ठोवेतिनविशेषः॥अनुभावस्तुस्वनिष्ठएवगमकः॥तस्यानुमापकत्वेनपक्षधर्मत्वनियमादिति॥ननुदयावीरःकरुणाएवकथंनांतेभवंति॥निरुपधिपरदुःखहानेच्छारूपासाचकरुणाविनानसंभवतीतिचेत्॥नकरुणस्यस्थायिभावःशोकः॥दयावीरस्यस्थायिभावउत्साहइतिस्थायिभेदेनभेदात्॥ननुदयावीरेकरुणसंप्रतीतेःकथंनिरितिचेत्॥करुणयाविनादयावीरस्याननुभावादितिकरुणायाअनुभावकत्वादिति॥भयानस्यविभावाः॥तत्रभरतः॥विकृतरवसत्वदर्शनसंग्रामारण्यशून्यगृहगमनात्॥गुरुनृपयोरपराधात्स्वजनकृतभयानकोत्पत्तयः॥वाटिकाबंधुबंधनश्रवणस्यशब्दादयउद्दीपनायाःयथा॥उद्यत्कोटिकटोरकेसरदलप्रोद्यद्विधुद्दीधितिकोचनीकृतजगन्निःशेषभूमीधरः॥स्फूर्जत्कंठनिनादभिन्नवसुधामार्गप्रविष्टद्विजप्रोद्दर्शीवचनप्रहर्षितबलिर्व्यालोकिमायाहरिः॥१॥विभत्सस्यविभावाः॥तत्रभरतः॥अनभिमतदर्शनेनचगंधरसस्पर्शजेर्दोषैः॥उद्वेजनेश्चबहुभिर्विभत्सरसःसमुद्भवति॥१॥अदृष्टवस्तूनांश्रवणस्मरणादयउद्दीपनायाःयथा॥योधानाप्यधरैरशोककुसुमैर्नेत्रैःसितैरंबुजैर्दंतैःकुंददलैःकरैःसरसिजैःसंपाद्यपुष्पांजलिं॥झित्कृत्यश्रवणौविधायकरिणोरक्तावसिक्तोगकैःप्रेतानांबहुभिःपुरःपुरभिदोनृत्यंसमारभ्यते॥१॥अद्भुतविभावाः॥तत्रभरतः॥यल्लोकेशास्त्रार्थयुक्तावाक्यशिल्पंचकर्मरूपंच॥तत्संबंधैरर्थैरसोद्भुतोनामसंभवति॥१॥मायेंद्र

जाल्यर्थस्याभादयउहनीयाःयथा॥उद्दामोद्दाममायोत्प्रतिभरदलनोदग्रजाग्रत्प्रभावःसोयंदेवोभवतुनरहरिस्मारितारोषविश्वः॥यस्यप्रोद्
प्रतापोद्भटविकटसटाकोटिभिःपाटितानामेतांण्यभ्योधराणांबहिरिवनिरगुर्वैघुतोकैतवेन॥१॥उद्दीप्तालेयथा॥व्योम्निप्रोद्गलणसीम्निसोध्वंकी
र्णेविस्तार्यचैलांचलंध्वांतेःकार्मणपाशभिस्त्रिजगतीनेत्राणिसंमोहयन्॥तारामौक्तिकानिविद्रुमश्रेणीरवक्त्रत्नाङ्कीर्णाङ्गीलत्यबहिःकरोतिवदनं
पंचास्यगोमायिकः॥१॥इतिश्रीभानुदत्तविरचितायांरसतरंगिण्यांविभावनिरूपणोनामद्वितीयस्तरंगः॥ ॥२॥अथअनुभावनिरूप्यते॥योरसान
नुभावयतिअनुभवेगोचरतांनयंतित्तेनुभावाःकटाक्षादयः॥कारणत्वेनानुभावकर्तृत्वेचछेदेनसंबंधिननुरसेकथमनुभावका
क्षेतिचेत्सत्यं॥स्थायिभावःपरिपूर्णोरसस्तस्यचोत्तरत्वानुज्ञापकेनविनाकथंज्ञानमित्यनुभावकर्मत्वेपेक्षणीयत्वात्॥ननुकटाक्षादयःकथमुद्दीपनवि
भावानभवंति॥दृष्टेकटाक्षादोकामिनोर्मनोविकारःपरिपूर्णोभवतिअनुभवसिद्धत्वेनाप्तनुमशक्यत्वात्॥किंचप्राचीनसंमतिरपि॥इषद्वंकितप
क्ष्मभिरनाकूतस्मितेर्बिंबितैरेतैरंतरवतांद्यसदृशंकरतोजेतुंजगद्वर्तते॥अतःपासुलहेमकेतनकदलद्रोणीपुरुरापभ्रियोरोमूलस्यविभावनादिहपुनः
किमाकांक्षसीत्यादयइतिचेन्न॥सत्यंकटाक्षादीनांकरणत्वेनानुभावकत्वंविप्रयत्नेनोद्दीपनविभावत्वं॥तथासतिनिरसानुभवावरणत्वेननायिकोप्रति
टाक्षादयोनुभावास्तेवहृष्टेगोचरीभूताःकामिनोमनोविकारंकारयंतोविषयत्वेनोद्दीपनविभावइति॥सचानुभावःकायिकमानसाहार्यसात्विका
भेदाच्चतुर्धा॥कायिकाभुजक्षेपादयः॥मानसाःप्रमोदादयः॥नाट्यचनुर्भुजत्वज्ञानादयआहार्याः॥सात्विकारोमोद्गमादयः॥शृंगारस्यानुभावाः॥तत्र
भरतः॥नयनवदनप्रसादैःस्मितमधुरवचोधृतिप्रमोदैश्च॥विविधैरंगविकारैरसस्याभिनयःप्रयोक्तव्यः॥१॥कटाक्षभुजक्षेपादयोउहनीयाः
मुक्ताहारस्तनकलशयोःकर्णयोःकर्णिकारमोलेर्मालायापरिभवभयादवदूरेन्यवारिहृष्टेभीष्टसमजनिपुनःसंभ्रवोभूषणायप्रातर्वीतोत्तरकम
च्छद्रोहदक्षःकयक्षः॥१॥हास्यस्यानुभावाः॥तत्रभरतः॥विलुताकोरवीकोरंगविकोरंविलुलवेषश्च॥हास्यंजनयेद्यस्मात्तस्मात्तेयोरसोहास्यः
॥१॥ओष्ठाधरविवरणदंतदर्शननासाकपोलस्पंदहृष्टिव्याकोशकुंचनादयउहनीयाःयथा॥पात्रीकृत्यकपालमंडलमिदंपीयूषभानोःकलो
वर्निकृत्यफणामणिंफणियतेःसंपाद्यतस्यांशिखां॥सायंदीपविधिंवितन्वतिशिशोर्मंदंहसंत्यानयाकिंचित्कुंचदपांगभागकुटिलादृष्टिःसमा
रोपिता॥१॥करुणानुभावाः॥तत्रभरतः॥निश्वासैश्चसरुदितैर्मोहाधिपरिवेदनैश्चैव॥अभिन्नेकयःकरुणरसादेहाघातादिभिश्चैव॥मुख ॥३॥
शोषणप्रलापवैवर्ण्योदयउहनीयाः॥यथा॥तनोतिनिर्गच्छतिगणपतेर्नाकमद्यापितस्यावाचोदेव्यास्यजनिशिथिलंकंठकणनेवदोष्णः॥अद्या

635
1995

प्याईभवतिकुचयोर्नीपिपाटीरपंकेनेत्रेनिर्घर्षत्यसिनपुनःकज्जलंस्थैर्यमेति॥१॥रौद्रस्यानुभावाः॥तत्रभरतः॥नानाप्रहरणसंकुलशिरसःकं
पैःकषायनिष्पेषैः॥घोरैरर्थविशेषैस्तस्याभिनयःप्रयोक्तव्यः॥भट्टकुंडिनोछपाउनायउहनीयाः॥यथा॥पेयेभीमेनबंधभ्रकुटिघनरवंदंतनिष्पी
डितोष्ठंनिक्षिप्तान्योन्यभिन्नविंध्याचलचटुलचमत्कारभाजाकरींद्रांतेषामेकोपकोपोलादिवभयविधुताकाचिदुद्दायलग्नाबिंबेपीयूषभानोर्मधुकर
श्रेणीलक्ष्मच्छनस्यछलेन॥१॥वीररसानुभावाः॥तत्रभरतः॥शौर्यैर्धैर्यैर्वीर्यैरुत्साहपराक्रमप्रभावैश्च॥वाक्येरक्षेपक्षेपैर्वीररसःसम्यगभिन
यः॥१॥विजयादयउहनीयाः॥नन्वतींद्रियस्यरसस्यज्ञापकाःकार्शीरधर्माभवितुमर्हंतिततएवचसर्वेदोक्तास्तथाचधैर्यंसोहोनशरीरोधर्मो
विनिवेत्सत्यं॥धैर्यपदेनचोत्साहस्याभावउत्साहपदेनचाश्रुपुलकादयोविवक्षिताः॥यद्वाअनुभावश्चतुर्विधःतत्रमानसोप्यनुभावउक्तःतस्यज्ञा
नमेवानुभावकर्तृत्वमानसमेंद्रियकंचेतिरविशेषः॥युद्धवीरस्यानुभावोयथा॥अयेवासवजित्समयसमरव्यापारदीक्षागुरुःपार्श्वेनस्यविपक्ष
पक्षदमनक्रीडाधनोरावणः॥इत्थंजल्पतिसर्वतःपरिजनेसंध्यास्मृतिंकुर्वतःश्रीरामस्यनकुंभकस्यपवनेक्षणःसकोपिक्रमः॥१॥दान
वीरस्यानुभावोयथा॥ध्वांतस्तोमधरेजगद्रूपकरेपाथोधरेवर्षतिक्रोडेव्याकुलवत्सगोकुलदयादीनेक्षणंकेशवः॥हस्तन्यस्तमहीधरच्यु
तिभियानेवोगुलापलेवैवर्ण्यंस्तस्तमुरारिकरोतिननतोःस्रस्तेहरत्यंशुकं॥१॥दानवीरस्यविभावोयथा॥औदास्यंनविधेर्हिगणनगृह्यासंवीक्ष्य
मद्भाजनंयाचेकिंतुभवंतमेतदखिलंकोत्सक्षणंतिष्ठतु॥दासश्चेदहमस्मितेवसुमतीसर्वंवसुगृह्यतांस्वर्णंचेद्गुरुदक्षिणाधनपतेरानीयसंपाद्यते॥भयानुकानुभावाः॥तत्रभरतः॥करचरणनेत्रमस्तकसर्वांगानांप्रकंपनेश्चैव॥शुष्कोष्ठतालुकंठैर्भयानकोनित्यमभिनेयः॥रोमां
चवदनवैवर्ण्यस्वरभेदादयउहनीयाः॥यथान्यस्तस्रस्तहरिणावलीढवदनव्याकीर्णपतोच्चयकाकुव्याकुलघोरघर्घरखंस्फारीभवल्लोच
नं॥कंपप्रस्खलदंघ्रिवामननतभ्रूवासोविनिन्नाधरंविस्तीर्णभुजगस्यचक्रकुहरेलक्ष्णस्यगावःस्थिताः॥बिभत्सानुभावाः॥तत्रभरतः॥आ
ननेनेत्रविधूर्णनलोचननासामुखस्थानैःअन्यकैर्वादपतनैर्बीभत्सःसंम्यगभिनेयः॥सर्वांगसंहरणशीवनादयउहनीयाः॥यथा॥कप
टहरेर्मुखकुहरेविलुतेसंवीक्ष्यदितिकरंलक्ष्मीः॥हतदैत्यपललकवलभ्रांत्यामुखमशुंकेपिदधे॥अद्भुतरसानुभावाः॥तत्रभरतः॥स्पर्श
यहणस्तुतिसेहीहाकारैश्चसाधुवादैश्च॥वेपथुगद्गदवचनैःस्वरभेदैश्चाभिनयस्तस्य॥निर्निमेषप्रेक्षणरोमांचादयउहनीयाः॥यथा॥पांड

बंधीस्यदोर्दंडरवंडितारातिमंडलं॥अथापिनाकिनोनेत्रेनिमेषोनैवजायते॥१॥इतिश्रीभानुदत्तविरचितारसतरंगिण्यांमनुभावनिरूपणंनाम
यस्तरंगः॥अथसात्विकभावनिरूप्यते॥तत्रभरतः॥स्तंभःस्वेदोथरोमांचःस्वरभंगश्चवेपथुः॥वैवर्ण्यमश्रुप्रलयइत्यष्टौसात्विकाःस्मृताः
मन्वस्यसात्विकत्वंकथस्यव्यभिचारित्वंनकुतःसकलरसधारण्यादितिचेत्॥अत्रकेचित्सत्वंनामपरदुःखभावनायामत्येतानुकूलत्वेने
नसत्वेनधृताःसात्विकाइतिव्यभिचारित्वमनादृत्यसात्विकत्वव्यपदेशइतितन्नानिर्वेदस्मृतिधृतिप्रभृतीनामपिसात्विकत्वव्यपदेशपत्तेः॥
नचपरगतदुःखभावनायामष्टावेतेसमुत्पद्यंतेइत्यनुकूलशब्दार्थः॥अतएवसात्विकत्वमपिषामितिवाच्यं॥निर्वेदादेरपिदुःखभावनाया मु
खतोदयात्॥अत्रेदंप्रभाति॥सत्वशब्दस्यप्राणिवाचकत्वादत्रसत्वंजीवशरीरंतस्यधर्माःसात्विकास्तथाचशारीरानोवाःस्तंभादयःसात्विकाभा
वाइत्यभिधीयते॥स्थायिनोव्यभिचारिणश्चभावाःशारीरधर्मत्वेसतिनिरोधःस्तंभःनचनिद्रापस्मारादावव्याप्तिः॥शारीरपदेनतेषांव्यावर्त्तनात्॥प्रलयभावेतुचेष्टानिरोधोनतुगतिनिरोधः॥अस्यविभावाहर्षरोगभयदुःखविस्मयविषादक्रोधाः
यथा॥श्रोणीपीनतरातनुःकृषतराभ्रूमीधरातीवरावक्षोजस्यतटीकुतोनिजकुटीमातर्मयागम्यतां॥इत्युद्भाव्यकदंबकुंजनिकटेनिर्विश्य
मंदस्मितंगोविंदेसमुदीक्ष्यपक्ष्म -लदृशास्तंभस्तिरोधीयते॥१॥वपुषिसलिलोद्गमःस्वेदः॥अस्यविभावाः॥मनस्तापहर्षलज्जाक्रोधभयश्र
मपीडाघातमूर्छाः॥कोनेनवमुखप्रांतेराजतेस्वेदबिंदवः॥हृष्यतामर्दनेनेवकुंतीकुसुमवृष्टयः॥१॥विकारसमुत्थरोमोथानंरोमांचः॥
अस्यविभावाः॥शीतालंघनहर्षभयक्रोधाः॥यथा॥बकुलःमकुलकोशरोषनिर्यन्मधुकरगुंजितभाजिकुंजिभूमौ॥पुलकयतिकपोलपा
लिमालिस्मितसुभगःकथमघनंदसूनुः॥१॥गद्गदस्वरप्रयोजकीभूतसरस्वरस्वभाववैजात्यंस्वरभागः॥अस्यविभावाः॥क्रोधभयहर्षमदाः॥
यथा॥व्यक्तिःस्यात्स्वरभेदस्यकोणदुक्तिःक्रियेतचेत्॥इतिपत्यौपुरोराधामौनमाधायतिष्ठति॥भावलेसतिशरीरस्यदोवेपथुः॥भावले
सतीतिविशेषणदानात्सूचकस्यंदादीनातिव्याप्तिः॥अस्यविभावाः॥आलिंगनहर्षभीतयः॥यथा॥कथयकथमुरोजदामहेतोर्यदुपति
रेषचिनोतुयंकजानि॥भवतिकरतलेयदस्यकंपःप्रियसखिमत्स्मृतिरेवमत्सपत्नी॥१॥विकारप्रभावलतवर्णान्यथाभावोवैवर्ण्यं॥
अस्यविभावाः॥मोहभयक्रोधशीतातपश्रमाः॥यथा॥कुकुंढेकुर्वनिक्काणमाननंश्लिष्टयोस्तयोः॥दिवाकरकरक्रांतशशिकांतिमिवा

॥४॥

637
1995

दधौ॥१॥विकारजनितमक्ष्णिसलिलमश्रु॥अस्यविभावाहर्षामर्षधूमभयशोकजृंभाशीतनिर्निमेषप्रेक्षणानि॥यथा॥विसृजविसृजचिन
दुःखधारामयमुपकंठमुपागतोमुरारिः॥इतिकथयितुमश्रुबिंदुरुष्णोनपतितिवक्षसिपक्ष्मलापनास्याः॥१॥शारीरत्वेसतिचेष्टानिरोधः
प्रलयः॥शारीरत्वेसतीतिविशेषणान्निद्रादेर्नातिव्याप्तिः॥स्तंभादयःशारीरधर्मतेषांसाहचर्यकथनेनप्रलयोपिशारीरधर्म एवतेनात्रचेष्टाप
देनशशरीरचेष्टाभिमता॥मनसस्तुकर्मभवतिनतुचेष्टा॥अतएवचेष्टाश्रयःशरीरमितिशास्त्रीयलक्षणं॥यथा॥नोवक्त्रनमितंधुतनचशि
रोव्यावर्तितंनोवपूर्वसोनश्लथमाहृतंनिगदितंनोवानिषेधाक्षरं॥शोणंनापिविलोचनंविरचितंव्रीडाकलाकोतरंचेवःकेवलमाननेमधुरिपो
र्व्यापारितंराधया॥१॥जृंभाचनवमःसात्विकोभावइति॥प्रतिभातिउज्जृंभाननमुत्फुल्लसत्कुचयुगंस्विद्यत्कपोलस्थलमित्यादिशृंगारतिलकोहो
सात्विकाभावसामानाधिकरण्यदर्शनात्॥नचस्वाभावानुभावइतिविपरीतनेवाकैंचस्यात्सत्यमनुभावत्वेभावत्वविरोधात्॥पुलकादीनांत
थादृष्टत्वात्॥नचोद्गाढदृष्टेत्रमर्दनादीनामपिभावत्वापत्तिः॥तेषांभावलक्षणाभावात्॥रसानुकूलोविकारोभावइतितस्यलक्षणं॥अंगमांस
स्फोटनविकाराःकिंतुशरीरचेष्टाःप्रत्यक्षसिद्धमेतत्॥अंगादसृग्विरक्षमर्दनंवापुरुषैरिच्छयाविधीयतेत्यतश्चजृंभाचविकारादेवभवति
तेन्निवृत्तौनिवर्त्तते॥यथा॥आधायमानंरहसिस्थितायासंभाव्यजृंभामचलत्समज्ञया॥चटुध्वनिस्मेरमुखोमहेशःकरांगुलीभिःकल
योंचकार॥१॥इतिश्रीभानुदत्तविरचितायांरसतरंगिण्यांसात्विकाभावनिरूपणंनामचतुर्थस्तरंगः॥४॥ ॥अथव्यभिचारिभावनिरूप्यते॥
तत्रभरतः॥निर्वेदग्लानिशंकाश्रमदैन्यचिंतामोहधृतिस्मृतिः॥१॥व्रीडाचपलताहर्षआवेगोजडतातथा॥गर्वोविषादऔत्सुक्यंनिद्रापस्मारएवतु॥सुप्तिर्बोधोमतिश्चाप्यवहित्थमथोग्रता॥मतिर्व्याधिस्तथोन्मादस्तथामरणमेवच॥
त्रासश्चैवविनर्कश्चदित्येतेव्यभिचारिणः॥इतस्ततोरसेषुसंचारित्वमनेकरसनिष्ठत्वमनेकरसव्याप्यत्वंवाव्यभिचारित्वं॥नचरोमांचा
दावतिव्याप्तिः॥तेषामपिसंग्राह्यत्वानोधभानाःशारीराव्यभिचारिणएतेचोत्तराव्यभिणइत्यादिशेषः॥ननुनिर्वेदादेःस्थायित्वंव्यभिचा
रित्वंकथमितिचेत्॥न॥रसपर्यंतस्थायित्वमितस्ततोगामित्वंचोपाधिभेदमाश्रायोभयसंभवात्॥स्वात्ममाननंनिर्वेदः॥संसारेहेयत्वेनबु भ
धिर्वानिर्वेदः॥तत्राविभावास्तत्त्वज्ञानापज्ञेहीर्षादयोनुभावाःखेदश्रमकार्श्यचिंताश्रुपातादयः॥यथा॥क्षोणीपर्यटनश्रमायविदुषांवादा

यविद्यार्जिनामानध्वंसनहेतवेपरिचिन्तास्तेधराभीश्वराः॥विश्लेषायसरोजसुंदरदृशामास्येलताद्दृश्यः कुज्ञानेनमयाप्रयागनगरेना राधिनारायणः॥१॥ग्लानिर्निर्वेदनानिःसहनावा॥तत्रविभावाः॥रत्यायासतदृक्षादयः॥यथा॥व्याहर्तुंपुनरीक्षणायनगिरःकंठाद्रुहिर्निःस. ताश्लेषाश्लेषविधिंविधातुमपिवानेवोन्नतादोर्लता॥प्रातस्तत्समयास्यगच्छतिहरौचंद्रेशुचंद्रानपंक्तिष्वाश्लिष्टकुरंगभंगुरकचस्तस्याश्चिंताद्दृश्यः॥१॥उत्कंठकोटिकानिष्ठप्रतिसंधानमिष्टहानिविचारोवाशंका॥तत्रदुर्नयपरकोटीदयोविभावाः॥अनुभावाः॥कंपक्रियाप्रछार नादयः॥एतेवित्तविलोचनागुरुजनाजिह्मायदोषाःखलाःघोराःक्रूरवचःप्रपंचयशसःस्वभ्रूश्वचक्षुःश्रवाः॥किंस्यादित्थमनर्थबीजम सकृत्संचिंत्यवक्षोरुहिस्फूर्जत्किंशुकदामवामनयनानिःश्वस्त्यविन्यस्यति॥१॥परोत्कर्षासहिष्णुतापरानिष्ठचिकीर्षावासूया॥तत्रवि भावाः॥मन्युर्दैन्यादयः॥अनुभावाःकोपचेष्टादोषोद्भावनादयः॥यथा॥हरसिरसिमयापिलब्धवासेनिवसतिकापिकल्पनुषारभा नोः॥इतितिरयतिविधुंतुदस्यमूर्निप्रतिभवनंप्रतिभूधरंभवानी॥१॥हर्षोत्कर्षोमदः॥दुःखसंभिन्नसुखानुभवउत्कर्षः॥तत्रविभावाः॥ पानं॥अनुभावाउत्तमानांनिद्रा॥मध्यमानांहसितं॥अधमानांरोदनं॥इंद्रियसंमोहःमूर्छानिद्रा॥नस्मादिंद्रियसंमोहननयनघूर्णनसाम्येन निद्रेवनिद्रा॥नचहर्षेव्यभिचारिभावेतिव्याप्तिः॥तत्रहर्ष्यमातस्यसत्त्वात्॥ननुतत्रोत्कर्षनिष्ठेतिविशेषः॥किंचतत्रमनसोमोहोत्रमनःप्र साद इतिस्वरूपभेदात्तत्रनिद्रारोदनोदयोत्रचपलकाद्यनुभावाइत्यनुभावभेदाच्च॥ननुनिष्ठतिष्ठक्षणंमूढमधुयावत्सिद्धाम्यहमित्या होवाररसेपिमहोदृष्टास्तिनत्रनिद्रारोदनंवाकथमनुभावोनहियोधःसंयतिरोदितिनिद्रातिवेतिचेत्सत्यं॥रसभेदेनानुभवभेदाश्रृंगा रेतोनुभावकाः॥वीरेनयनारुणचमत्कारादयः॥सामान्येनचमत्कारेतनयनघूर्णनवचनस्खलनादयश्चेति॥यथा॥रसानांरससत्यसोम पुस्वयमस्मानमनर्घकंजनुः॥इतितत्रसमस्तमिंद्रियंप्रतिबिंबस्यमिषेणमज्जति॥१॥आयासप्रभवःपराभवःश्रमः॥तस्यविभावा रत्यर्थगत्यादयः॥अनुभावाः॥स्वेदादयःयथा॥सरामचंद्रःसहनिर्गतायाःस्वेदांबुसेसिक्तयोधरायाः॥अपोगपांतैर्मिथिलात्मजायाः श्रमानशेषान्शिथिलश्चकार॥१॥उत्थानाघक्षमत्वमालस्यं॥तत्रविभावागर्भादयः॥यथा॥हरंहरंतंस्मनहारयष्टिंकरेणरोधेननृणांकृतावकू॥गिरेःस्तनागर्भवतीविहस्यदृगंचलंकांतरयांचकार॥१॥दुःखस्थादुखातिरेकोवादैन्यं॥अनोज्वल्यमितिकेचित्

॥५॥

539
1995

तन्न॥तस्यबहिर्विषयत्वेननदनुभावकत्वात्॥विभावाविरहादयोरतिप्रादयर्ऽहनीयाः॥अनुभावाः॥कायक्लेशक्षतीडादयः॥यथाज्ञात्वरणा नां॥अंसेकुंतलमालिकास्तनतटेनेत्रांभासानिम्नगामाद्यन्मधकुंजरेदृढशनप्रांतेविलग्नेमनः॥किंचान्यद्विरहानलेनसरसंसंदह्यमाने वपुर्गेहेपोढिमकेनचेनस्कृतनोफेनोच्चयंमुंचति॥१॥चिंताध्याने॥ध्येचिंतायामित्यनुशासनात्॥ध्यानंचनस्मरणात्मकंस्मृतिभावस्यायेयेपृथक्त्वेनकथनात्॥किंतुचिंनैकाग्र्येनाइष्टार्थेप्रभृतयोविभावाः॥अनुभावास्तापश्वासादयः॥यथा॥शंभुध्यायसिशीतलाजतनये किंनामजानीमहेतस्यैवाक्षिननूनपाद्विवतनोतापःसमुन्मीलति॥अक्ष्णेरश्मिषेणगच्छतिबहिर्गात्तरंगावलिःपांडिम्नःकपटेनचेदकलिकाकोनिःसमुन्मीलति॥१॥मोहोवैचित्त्यं॥मुहवैचित्यधातोःमोहनंमोहइतिभावव्युत्पत्तेर्मोहशब्दः॥वैचित्यंकार्याकार्यापरिछेदः॥तस्यावि भावाभीत्यावेगानौचित्यादयः॥अनुभावाःस्तेभपानघूर्णनादर्शनविस्मरणादयः॥यथा॥अंतस्मेरसकर्णकेतकदलद्राणिद्युतिद्रोहिणीलक्ष्मीवी क्ष्यसमुत्खादिदुवदनाक्षीरांबुधेरुत्थितो॥शंभुस्तेभशनाकुलःशतमखब्रह्मण्यमूर्द्धेंद्रियःसोप्यज्ञानभुजंगपानपवनोजातस्त्रिलोकीपतिः॥सं स्कारजन्यंज्ञानंप्रत्यभिज्ञादिरूपस्मरणरूपंच॥संस्कारजन्यतेनोभयसंग्रहः॥अन्यथा॥प्रतिभिज्ञायाःपृथक्भावापत्तेः॥संस्कारोद्बोधकाःसदृ शादृष्टचिंताद्याः॥अनुभावाःभ्रूसन्नुन्नयनादयः॥प्रतिभिज्ञायथा॥कालिंदीसरसःसमेत्यनभसःक्रोडेपरिक्रीडतेचक्रंदूदमिदंसुधाकरकला माक्रम्यविस्फूर्जति॥चंद्रोपिस्मरचापचापलचमत्कारंसमालंबतेनस्मारंस्मारमकंदबकुंजकुहरेराधायरिभ्राम्यति॥१॥स्मृतिर्यथा॥वदनोन्नु जलग्नदृङ्निपातेमयिबध्नत्यवनंसमंसमूले॥दरकुंचितदृष्टिराधिकायाःस्मितकिंचीरितरमाननंस्मरामि॥१॥धृतिःसंतोषोदुःखबुद्धि र्वा॥विभावाज्ञानशास्त्रादयः॥अनुभावाअव्यग्रभोगादयः॥यथा॥भूषाभस्मरजांसिवेश्मविपिनंवृद्धोवृषोवाहनंचैलंचर्मनथापिमन्म थरिपोर्भोगंकिमभ्रश्यति॥१॥इषलंकिमुहीयतेकिमुमहादेवेतिगीयतेकिंपातस्यनदेवदेवरतिवासंज्ञाननेस्यज्यते॥१॥स्वछंदेक्रियासं कोचोपीडा॥तत्रशंकायांत्रासेचानिद्याप्तिः॥तत्रक्रियाविरहपवननुक्रियासंकोचः॥अत्रातिभावादुराचारादयोनुभावाः॥शिरोनमननय नप्रच्छादनादयः॥यथायोध्यावर्शने॥भितोभितोप्रतिफलंगतभालसिंदूरबिंदुदृष्ट्वादृष्ट्वाकमलनयनाकेलिदीपभ्रमेण॥कांतेचैलेहरति हरितोलोलमालक्ष्यतीयत्नाप्रछादयतिपरितःपाणियकेरुहेण॥१॥इतरदितरक्रियायाःशीघ्रतावाचपलता॥मात्सर्यंदूषणगादयो

विभावाः अनुभावावाक्यारूप्यप्रहरादयः॥ यथा॥ लंकावैरिणि सेतुकारिणिरणक्रीडाचमत्कारिणीप्रोद्दामेदवचःप्रसारितिपुरोरामेधनुर्धन्वि
नि॥ जातस्तस्यदशाननस्यसमारंगारंभदंभस्फुरत्केयूरक्षणिनानुनेयविशिखत्यागाःकरश्रेणयः॥१॥ चेतःप्रसादोहर्षः॥ पुत्रजननप्रिय
दर्शनादयोपिभावाअनुभावाः पुलकश्वेदाश्रुस्वरभेदादयः॥ यथा॥ कुंचकुंभपातिराधाव्रजनिमुकुंदमुखेंदुवीक्षणाय॥ विरचयतिनमध्य
भंगभीतिगणपतिनापिनिर्मितेवगोरवणि॥१॥ आकस्मिकेष्टानिष्टनिपातविवर्त्तःसंभ्रमोवाआवेगः॥ वैरिदर्शनप्रियश्रवणोत्पादयोविभा
वाअनुभावास्त्वराशरीरस्खलनविपर्यासादयः॥ यथा॥ एकोवासक्तिविश्लेषेसहचरीस्कंधेद्वितीयः करःपश्चाद्भ्रमतिचक्षुरेतन्मितरद्र
तुंमृगेभ्यामिति॥ एकंकंटकविद्धमस्तिचरणंनिर्गंतुमुत्कंठनेचान्यंद्वैरमृगीदृशोरघुपतेरालोक्यसेनाचरान्॥१॥ सकलव्यवहारक्षमत्व
नवत्वाजडता॥ नचमूर्छापस्मारनिद्रास्वप्नेष्यतिव्याप्तिः॥ तत्रज्ञानविरहात्॥ नचालस्यभीतित्रासेष्वतिव्याप्तिः॥ तत्रतत्रकतिपयव्यवहार
स्यसत्वात्॥ इष्टानिष्टदर्शनादयोविभावाअनुभावाअनवभाषणेक्षणेष्टनिष्पापरिच्छेदादयः॥ यथा॥ दुःखारवारिनिधिपारमुदा
रवीर्यमागच्छतोहनुमतोहसितेविनेतुः॥ उद्वीक्ष्यनीरनिधिनीरमधीरविचित्रार्षितादवपनःकपोयबभूवुः॥१॥ आत्मनिसर्वाधिकत्वबुद्धिः
सर्वस्मिन्नधमत्वबुद्धिर्वागर्वःबलैश्वर्याभिजनलावण्यादयोविभावाः॥ अनुभावाअवज्ञाभ्रूक्षेपेक्षितहसितपोरुषप्रकाशादयः॥ यथा
परशुरामवाक्ये॥ निःक्षत्रेकलशोद्भवेनजलयोगौरीपतेरगयाहेतुंहैतिवपुर्लताठदहनेयावत्स्वतःप्रक्रमः॥ तावत्तत्रमयाविपक्षनगरी ना
रीदृगंभोरुहद्वंदप्रस्खलदश्रुवारिपठलैःसृष्टःप्रयोराशयः॥१॥ इष्टसंशययोनिष्पत्तिर्जडतासावाविषादः॥ इष्टपदेनजीवनधनयशःशरीर
पुत्रकलत्रादयउक्ताः॥ अपराधधनगमनादयोविभावाअनुभावाउत्तमानांसहायान्वेषणेपापचिंतादयोमध्यमानांविमनस्कता॥ अधमा
नांध्यानधारणमुखशोषणनिश्वासादयः॥ यथा॥ प्रत्यावृत्त्यदिवाजिभवनंवाचांभवेत्प्रत्ययोनिर्गच्छामिकुजनमेवयदिवाकोवेद
किंस्यादितः॥ तिष्ठाम्येवयदिक्वचिद्वननटेकिंजातमेतावतामध्येवर्मकलानिधेःसमुदयोमानःकिमात्मन्यलं॥१॥ औत्सुक्यंकालास
हिष्णुतासकलेंद्रियाणामेकैरेकक्रियारंभोवा॥ प्रियस्मरणादयोविभावा॥ अनुभावास्तूद्गागौरवादयः॥ यथा॥ आद्यःकैरपिकेळि
कौतुकमनोराज्यैर्द्वितीयःपुनर्मौलिकेनकचारुचंपकनवांभोजस्रजांगुंफनैः॥ कांचीकुंडलहारहेमवलयन्यासैस्तृतीयस्ततो नीतःसु

॥६॥

641
1995

दरिवासरस्यचरमोयामःकथंयास्यति॥१॥ इतरद्रिद्रियमपहायमनस्त्वचियत्रावर्त्ततेतदानिद्रा॥ सत्यप्यकारणत्वात्॥ सुप्तात्माद्रिःश्रम
रतेनोक्ता॥ स्वप्नवहनाडिकाक्लोमनोयत्रावर्त्ततेतदास्वप्नादिसंभवः॥ तत्रविभावाः॥ स्वभावचिंतालस्यक्रमादयः॥ अनुभावाःपार्श्वकरण
यनभ्रूवलनविभ्रमवचनस्यप्रदर्शनादयः॥ यथा॥ गच्छन्कश्चेतपनंदुहितुःपिछगुच्छावसंतःपश्यन्नसद्दशनमसक्रुश्रक्षुषाकुंचितेना॥ स्नि
ग्धापांगःशिथिलचरणःस्तोकविस्रष्टहासःस्वप्नेदृष्टःकमलकलिकामेदितोमेघखेडः॥१॥ यद्वाघावेधावेशोस्मारः॥ तत्रविभावाअपवित्र
शून्याछिनिधानवेशम्योक्तदुःखभयादयः॥ अनुभावाःकंपकेननिश्वासभ्रूनिपातविपर्यासजिह्मालोलनादयः॥ यथा॥ उद्वेलूनचपलूवाधरस्त्रः
पर्यस्तशस्त्रभुजाःस्फूर्जल्लोरकफेनबिंदुपटलव्याकीर्णदेहश्रियः॥ भ्राम्यद्भृंगकलापकुंतलजुषःश्वासानिलोत्कंपिताःशैलेप्रेक्ष्यकपर्दिनंपति
तमपस्मारंदधुर्मूरुहः॥१॥ मूर्छाचैत्रेबीभवति॥ तत्तमपविहाययदामनःपुरोनतिवर्त्ततेतदासुप्ते॥ निद्राविभावा॥ अनुभावानप्रनिमीलितप्र
ळयश्वासोघूर्णादयः॥ यथा॥ श्वासोश्वासप्रचलदधशपोतमामीलिताक्ष्यंक्रीडाकुंजेनपनदुहितुःस्फ्यतश्रीमुरारेः॥ अंतःस्मेरविभर्तेनिभृ
तंकापिकर्णीवतंसकाचिद्वा द्वोःकनकवलयंदाममूर्ध्वातिकाचित्॥१॥ इंद्रियाणांप्रथमःप्रकाशाविबोधः॥ निद्राछेदोविभावाः॥ अनुभावाअंगा
रुचिर्जृंभाश्रुमर्दनोद्गतिमोरनादयः॥ यथा॥ राधायासिहसादृशा कुवलयद्रोणीदरिद्रंनभःकुर्वत्याःकलकंठकंठनिनदैःसोकेतिकैर्जायतः
अंगालूषिविनर्त्तमानवपुषोदेवस्यकंसद्विषोलोलापांगतरंगभंगचतुरंनेत्रोबुजंपातुनः॥१॥ परापकारप्रशमनोक्षटसनीहामर्षः॥ विभावाअ
वमानाक्षिप्तेत्यादयोऽनुभावाः स्वेदशिरःकंपनयनारुण्यादयः॥ यथा॥ अपाशानेवभर्तुःसरसिजनयनासूनुसेनासमेतंबध्वालोलमूर्ते
दशमुखममिनोभूतळेभ्रामयामः॥ शश्वन्मार्गावलोकप्रचलनयनयासीनयासाकमेतोलकामुत्पाद्यकिंवारघुपतिचरणाभोजयोर्योजया
मः॥१॥ आकारव्यवहारसंगोपनमवहित्थं॥ विभावाव्रीडाधार्ष्ट्यकौटल्यगौरवादयः॥ अनुभावाःअन्यथाकरणअन्यथाप्रेक्षणअन्यथा
कथनादयः॥ यथा॥ त्यक्त्वासभ्रविभीषणःसगतवान्बंधुःसपायोनिधिःकिंचलध्यतिसोपिसारनिरतःसीतापरित्यज्यतां॥ इत्याकर्ण्यसद्
भृणस्यवचनंस्मेराननोरावणोमुक्त्वारामकरेणकंठसविधेकीरस्यविन्यस्यति॥१॥ उग्रानानिर्दयाताः॥ विभावाअपराधदोषकीर्तनचो
दयोअनुभावस्तु ननाउनादयः॥ यथा॥ कोदंडरणाभिन्नभूपतिभुजादंडैःप्रचंडैरलंतत्रज्ञातिपक्षराजमणीगुणैर्गुणिना॥ क्रूरा

कारकुशरतारपतनप्रभ्रष्टदृष्टिधृक्ष्यदं ःतदंतेः स्तोस्ति विशिरवस्तूक्ष्यमुद्दीक्षते॥ यथार्थज्ञानेमति॥अत्रविभावाः शास्त्रचिंतादयः
अनुभावाः॥शिष्योपदेशमूक्षेपकरचालनचातुर्यादयः॥लटीनेत्रपुटीपयोधरघटीक्रीडाकुटीहोस्तरी पादीरदवर्णनेनकविभिर्मूढैर्दिनं
नीयते॥गोविंदेतिजनार्दनेतिजगतीनाथेतिदुःखेतिचव्याहारैरसमयंस्तदेकमनसोपुंसोयदिक्रामति॥ नयविनयाननयोपदेशोपातंभा
अत्रैवांतर्भवति॥उपदेशोयथा॥वस्तुप्रदेयंखलतोविधेयंमनोनिधेयंचरणेहरस्यानिजंविधेयंस्तुतिभिर्विधेयंविधिर्विधेयंविधिरेव
वेति॥१॥उपालंभोपिद्विविधः।प्रणयात्मकोपालंभात्मकप्रणयात्मकश्च॥पाषाणेयदिमार्दवंयदिपयोधाराहुतेःशीतरव्यालीनांचदनेसुधा
यदिरवेर्गर्भेहिमानीयदि॥स्थेमोकिंचसमीरणेयदितदास्वप्नेभवेत्सत्यतोकिंत्रासस्मरभूमिपालभगवन्क्रोधान्धुधाधावसि॥१॥
कोपात्मामर्षएवांतर्भवति॥यथा॥ननयसिजगदेवदेवदेवाभरणसुधारसुशीतलंहिमांशो॥उरसिवहसिमेतेथापितंपंयदुपतिवक्र
सरसासिकिंजवीमि॥१॥जरादिविकारोव्याधिः॥कुपितधातुभयकामक्लेशादयोविभावाः॥अनुभावाः॥देशोपद्रवाः॥यथा॥दातुंस्वीय
मनर्घहीर्घितिंतपदेतस्याःकुरंगीदृशःकेयूरंकनकोत्तुलीयकमिवानेतुंबहिर्गछति॥अन्यत्सर्वंनिवेदयामिकिमितोवेणीमिशात्कालियो
दृष्टोतोचनवारिकालियसनूभोत्यापरिभाम्यति॥१॥विनाविचारमाचारंनुन्मादः॥नचागम्यागमनेतिव्याप्तिः॥विनाविचारमितितत्पदेन
नघाबर्त्तनात्॥तत्रसुखमुदिश्यतदर्थेविचारएवक्रियानसमीचीनेत्यन्यदेतत्॥अपेक्ष्यकारितोन्मादइतियस्यमतंतत्रदूषणंतत्रवि
भावाःप्रियवियोगविभवभ्रंशादयः॥अनुभावावृथालपितंवृथाहसितंवृथारोदनादयः॥यथा॥नेषोकापिचकास्तिकांचनलतासेवास्ति
मेराधिकाकृष्णाचेन्नकुतोपिजल्पतिनदासंमूर्छितावर्त्तते॥इत्थंहंतविचिंत्यसिंचतिमुहुर्नीरैरधीरैर्दृशोचांतंवातनुतेकरेणभुजयोरा धा
यसंभाषते॥१॥प्राणनिःक्रव्यणंनिधनंविभावानुभावोस्पष्टो॰यथा॰पर्यस्तोधिविकीर्णबाहुपततःसंग्रामभूमोभियालैकेशस्यनके
शपाशमनिलःस्रष्टुंसमाकांक्षति।उक्षंनोछकरंकरैःकिरतिवावक्त्रारविंदेनवास्वेस्वेधाम्निमिथःकथामपिसुराःनोव्यक्तमातन्वते॥१॥
मनोविक्षोभरुन्मादः॥तथावविचारोत्थोमनःक्षोभोभीतिराकस्मिकमनोक्षोभरुन्मादइतिविशेषेणैवद्वयोरेकत्वेनपरिग्रहः॥तत्रविभा
वाघोरस्वनश्रवणघोरसत्त्वदर्शनादयः॥अनुभावास्तंभस्वेदरोमांचत्रस्तगात्रतादयः॥यथा॥श्रुत्वैवानोहरिताभरामवदनादिंद्र

॥७॥

643
1995

स्यशोकोवहन्कुर्वन्कानरमोनरंसभगवन्मेनाकभूमीधरः॥कुंचत्यक्षतिभुग्निनश्रतिक्लेनप्रत्यंगन्येलाहतित्यक्त्याहतिसिंधुराजनिर्मकुमा
कीक्षति॥१॥विचारोवितर्कः॥विभावाविप्रपत्तिसंशयसाधकबाधकमानसमुद्भावनादयः॥अनुभावाः शिरःकंपभ्रूचापलनादयः॥वितर्क
श्चनुर्विधः॥विचारात्मासंशयात्मानध्यवसायात्माविप्रतिपत्यात्माचेति।अनध्यवसायस्तूक्तरकोटिकः संशयः॥प्रत्येकमुदाहरणानि॥
कालिंदीविलुठत्कंठोरकमठक्रूरंधनुःशौभवंरामोबालमृणालकोमलवपुर्वैदेहीवतसोभुवः॥व्याहारप्रखलाःखलाःक्षितिभृतांगोष्ठीर्गरिष्ठा
पुरस्तस्यालंबकमेषतिष्ठनिममश्रेयस्करोभास्करः॥१॥सौंदर्यस्यमनोभवेनगणनालेखाकिमेस्वालुतालावण्यस्यविलोकितेत्रिजगती
मेषाकिमुर्वीविक॥आनंदद्रमकंदलीनयनयोःकिंवासमुज्जृंभतेराधायाःकिमुवास्वभःवसुभगारोमावलिरुन्मीलति।कथयकथयकेयं रंभे
जनंखेलयंतीविहरतियमुनायाःपायसिस्वर्णवल्लिः॥अयमुदयतिकोवाशाद्रद॥शीतभानोस्तदुपरितिपिराणामेषकोवाविवर्त्तः॥१॥इयं
नवितस्तत्सुधाकरकलाधिकाराधिकाकरंकिरणमालिनंकिमुसंदेतनस्यावपुः।नवाकनकमंजरीवहतिखंजरीटंयतस्ततःस्मरमदाल
साकथयकेयमुन्मीलति॥१॥ननुदशावस्थास्वाभिलाषगुरुकाकथाप्रलापाव्यभिचारिभावाभ्यंतरेणगणतास्तत्किंस्वतंत्राएवेतिचेत्।न।
औत्सुक्येभिलाशस्यवर्णनात्मस्मृत्योगणकथायाउन्मादेप्रलापस्योनर्भावात्॥अत्रप्रतिभाति-छकमधिकोव्यभिचारिभावइति॥तोचू
लाहरणछलेनरभसाश्लेषोपिसंविधृतइतिश्रृंगारेदर्शनात्।हासेचव्यपदेशतापदेशयोश्चदर्शनात्॥वीथिभेददर्शनाच्च-संगुप्तिक्रियासं
पादनंछलं-विभावाअवमाननेप्रतिपक्षकृचेष्टादयः॥अनुभावावक्त्रेभ्रुनिभृतवीक्षणप्रहसितप्रच्छादनादयः॥श्रृंगारोयथा॥सैकेलीकुतुका
ननंप्रविशतोरन्योन्यकौतूहलादन्यत्प्रतिभानमारचयतोरन्योन्यमुत्पस्यतोः॥कुंचत्कायमितस्ततःकिसलयैरात्मानमावृण्वतोराधामाध
